International Research Journal of Humanities, Language and Literature
ISSN: (2394-1642)
Impact Factor 6.972 Volume 11, Issue 02, Feb 2024
Association of Academic Researchers and Faculties (AARF)
Website-www.aarf.asia, Email : editor@aarf.asia , editoraarf@gmail.com

# कुन्तकोक्तदिशा कविप्रस्थानहेतवः

**डा. पि.के . दीपक् राज्**
**सहायकाचार्यः,कालिकट् आदर्शसंस्कृतविद्यापीठम्**

**सारांशः**

प्राचीनालङ्कारिकेषु नितरां प्रसिद्धः आचार्यः भवति वक्रोक्तिसम्प्रदायप्रवर्तकः कुन्तकाचार्यः। वक्रोक्तिः वैदग्ध्यभङ्गीभणितिरुच्यते इत्युक्त्वा काव्यात्मस्थाने वक्रोक्तिं प्रतिष्ठापयति कुन्तकः। वक्रोक्तिजीविताख्ये स्वग्रन्थे प्रथमोन्मेषे एव काव्यस्य प्रयोजनं सामान्यलक्षणं चाभिधाय कविप्रस्थानहेतवः मार्गाः सविस्तरं प्रतिपाद्यन्ते आचार्यैः। प्राचीनैरालङ्कारिकैरपि विदर्भादिदेशविशेषसमाश्रयणेन रीतयः प्रोक्ताः। एतदयुक्तियुक्तमिति सयुक्तिकं खण्डयित्वा स्वमतानुगुणं मार्गान् सविस्तरं वर्णयति कुन्तकाचार्यः। देशविशेषसमाश्रयणेन रीतिभेदान् कृतवतां खण्डने युक्तिः तथा तत्स्थाने मार्गाणां प्रतिष्ठापनञ्च कथं कृतमिति शोधपत्रेस्मिन् प्रस्तूयते।

**कुञ्चीशब्दाः**
कविप्रस्थानहेतवः, रीतिः, वैदग्ध्यभङ्गीभणितिः, सुकुमारः, विचित्रः, मध्यमः

**आमुखम्**

काव्यारम्भादेव काव्यविषये चर्चापि प्रारब्धेति वक्तुं युक्तम्।काव्यनिरूपणमधिकृत्य परामर्शाः प्राचीनसाहित्येषु दृश्यन्ते। तथापि काव्यनिरूपणस्य शास्त्रत्वेन प्रतिपादनम् अनन्तरकाले एव जातं दृश्यते। भामहादिभिराचार्यैः काव्यानि समग्रतया निरूपितानि। तत्र काव्यनिरूपणसन्दर्भे काव्यस्यात्मा कः इत्यन्वेषणात् अलङ्कारशास्त्रे ध्वन्यादयः बहवः सम्प्रदायाः समागताः। तेषु सम्प्रदायेषु अन्यतमो भवति कुन्तकाचार्यस्य वक्रोक्तिसम्प्रदायः। चतुरुन्मेषात्मके वक्रोक्तिजीविताख्ये ग्रन्थे सः वक्रोक्तिं काव्यात्मस्थाने प्रतिष्ठापयितुं प्रायतत। तत्र प्रथमोन्मेषे काव्यस्य सामान्यलक्षणमभिधाय विशेषलक्षणविषयप्रदर्शनार्थं मार्गभेदनिबन्धनं त्रैविध्यं कथ्यते।

**मार्गाः**

मार्गाः कविप्रस्थानहेतवः। काव्यकरणस्य कारणभूताः इत्यर्थः। कुन्तकमते मार्गाणां त्रैविध्यं विद्यते। उच्यते तेन-

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।

सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः।। (वक्रोक्तिजीवितम् 1-24)

ते च मार्गाः सुकुमारः, विचित्रः, मध्यमः अथवा उभयात्मक इति त्रिधा। उभयात्मक इति सुकुमारस्य विचित्रस्य च छायोपजीवी इति तात्पर्यम्।

**प्राचीनानां मतम्**

अस्मिन् विषये बहुविधाः विप्रतिपत्तयः वर्तन्ते। प्राचीनैः वामनादिभिराचार्यैः विदर्भादिविशिष्टदेशाश्रयणेन वैदर्भीत्यादयः तिस्रः रीतयः प्रोक्ताः। तासां वैदर्भ्यादिरीतीनाम् उत्तमाधममध्यमानां विचित्रतया त्रैविध्यम्। अपरैश्चाचार्यैः दण्ड्यादिभिः वैदर्भी गौडी चेति रीतिद्वयमाख्यातम्। एतदुभयमपि अयुक्तियुक्तमिति कुन्तकस्य अभिप्रायः। यतो हि रीतिभेदानां देशभेदाधारेण रचनायां देशानाम् आनन्त्यात् असंख्यत्वं प्रसज्येत। अपि च विशिष्टरीतियुक्ततया काव्यरचना मातुलेयभगिनीविवाहवत् देशधर्मतया व्यवस्थापयितुं न शक्यते। तादृशकाव्यरचना पुनः शक्तिप्रभृतिकारणसमुदायस्य समवायमपेक्ष्यमाणं केनापि प्रकारेण अनुष्ठातुं न शक्यते।

एवं रीतीनामुत्तमाधममध्यमत्वभेदेन त्रैविध्यमपि नाङ्गीकरोति कुन्तकः। यतो हि सहृदयहृदयानन्तकारिकाव्यरूपनिर्धारणप्रस्तावे वैदर्भीरीतिवत् रामणीयकस्य असम्भवात् मध्यमाधमभेदयोः उपदेशव्यर्थतामायाति।

कुन्तकमते कविस्वभावस्य भेदस्वीकरणेन काव्यमार्गभेदो भवितुमर्हति। सुकुमारस्वभावस्य कवेः तादृशी काचित् सहजा शक्तिः समुत्पन्ना स्यात्। तया शक्त्या तादृशसुकुमारमनोरमां व्याख्यां रचयति। तथैव विचित्रस्वभावस्य सौकुमार्यव्यतिरेकिणा विचित्रतया रमणीया काचित् विशिष्टा एव शक्तिः परिलसति। तया च शक्त्या नैपुण्यमनोहरां व्याख्याम् आबध्नाति। एवमेव उभयस्वभावयुक्तस्य कवेः उभयपरिस्पन्दसुन्दरव्युत्पत्त्युपार्जिता काचित् शक्तिः समुल्लसति। एवं सः सुकुमारविचित्रशक्तिछायाद्वयपरिपुष्टः कविः सम्पद्यते।

ईदृशाः कवयः सम्पूर्णकाव्यकरणसमूहस्य पराकाष्ठायामधिरूढिरमणीयं सुकुमारं विचित्रम् उभयात्मकञ्च काव्यमारभन्ते। त एव भेदाः काव्यरचनायां कारणभूताः मार्गा उच्यन्ते।

**सुकुमारमार्गः**

अम्लानप्रतिभोद्भिन्ननवशब्दार्थबन्धुरः।

अयत्नविहितस्वल्पमनोहारिविभूषणः।।

भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः।

रसादिपरमार्थज्ञमनःसंवादसुन्दरः।।

अविभावितसंस्थानरामणीयकरञ्जकः।

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

विधिवैदग्ध्यनिष्पन्ननिर्माणातिशयोपमः।।
यत् किं नापि वैचित्र्यं तत्सर्वं प्रतिभोद्भवम्।
सौकुमार्यपरिस्पन्दस्यन्दि यत्र विराजते।।
सुकुमाराभिधः सोयं येन सत्कवयो गता।
मार्गेणोत्फुल्लकुसुमकाननेनेव षट्पदाः।। (वक्रोक्तिजीवितम् 1-25,26,27,28,29)

उपर्युक्तलक्षणयुक्तोयं सुकुमारमार्गः येन महाकविकालिदासादयो गताः तदाधारेण काव्यानि कृतवन्तः। कथमिति चेत् उत्फुल्लकुसुमकाननेनेव षट्पदाः। विकसितकुसुमकाननसाम्येन मार्गस्यास्य कुसुमसौकुमारसदृशम् आभिजात्यं द्योत्यते। मार्गेस्मिन् कियन्मात्रमपि वक्रोक्तियुक्तत्वं तत्सर्वमपि अलङ्कारादिप्रतिभोद्भवं कविशक्तिसमुल्लसितमेव। तत्र आहार्यमथवा यथाकथञ्चित् प्रयत्नेन निष्पाद्यं किमपि नास्तीत्यर्थः। मार्गस्यास्य माधुर्यं, प्रसादं, लावण्यं, आभिजात्यं चेति चत्वारः गुणा अपि कुन्तकाचार्येण सोदाहरणं प्रतिपाद्यते।

**विचित्रमार्गः**

अतिदुःसञ्चरः अयं मार्ग इति कुन्तकः कथयति। अत एव विदग्धकवयः व्युत्पन्नाः केचिदेव केवलं अनेन मार्गेण गताः काव्यानि कृतवन्तः। अनेन मार्गेण गमनं कथमिति चेत् ख़ड्गधारापथेनेव सुभटानां मनोरथाः इव। अनेन च मार्गस्यास्य दुर्गमत्वं तत्प्रस्थितानां विहरणप्रौढिश्च प्रतिपाद्यते। उच्यते च तेन-

सोतिदुःसञ्चरो येन विदग्धकवयो गताः।
खड्गधारापथेनेव सुभटानां मनोरथाः।। (वक्रोक्तिजीवितम् 1-43)

अस्यापि मार्गस्य माधुर्यं, प्रसादं, लावण्यं, आभिजात्यं चेति चत्वारो गुणाः।

**मध्यममार्गः (उभयात्मकः)**

यत्र स्वाभाविकी तथा व्युत्पत्त्युपार्जिता च शोभा अतिशयशालिनी तथा सौकुमार्यं वैचित्र्यं चेत्युभयमपि सङ्कीर्णतां प्राप्य शोभते सः काव्यस्य मध्यममार्गः। उच्यते कुन्तकेन

वैचित्र्यं सौकुमार्यं च यत्र सङ्कीर्णतां गते।
भ्राजेते सहजाहार्यशोभातिशयशालिनी।। (वक्रोक्तिजीवितम् 1-49) इति।

सुकुमारविचित्रमार्गयोः सम्पत्तयः अस्मिन् मार्गे स्पर्धया विराजन्ते। अत्रापि पूर्वोक्तवत् चत्वारो गुणाः।

**उपसंहारः**

प्राचीनानां रीतिः तथा तत्भेदकल्पनञ्च कुन्तकाचार्येण नाङ्गीक्रियते। अत एव सः युक्तियुक्तं तेषां रीतिवादिनाम् आचार्याणां खण्डनं कृत्वा सविस्तरं सोदाहरणं स्वाभिमतान् मार्गान् विवृणोति। देशविशेषस्याधारेण रीतिभेदप्रकल्पनं दोषदुष्टमिति सयुक्तिकं प्रतिपाद्य सुकुमारादयः त्रयः मार्गाः सोदाहरणं प्रतिपादिता इति अस्य वैशिष्ट्यम्।

**परिशीलितग्रन्थसूची**

1- कुन्तकः, (सम्पादकः पं.परमेश्वदीन पाण्डेयः), वक्रोक्तिजीवितम्, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, 2020

2- भामहः, (सम्पादकः नागनाथशास्त्री पि.वि) काव्यालङ्कारः, मोतिलाल् बनारसीदास्, 1970

3- दण्डिः,काव्यादर्शः, चौखम्बा विद्याभवन्, वाराणसी, 1972

4- दण्डिः,सम्पादकः रङ्गाचार्यरेड्डी शास्त्री, काव्यादर्शः, भण्डारकर् ओरियन्टल् रिसेर्च् इन्स्टिट्यूट्, पूने, 1938